दिना। येन भूषितवद्भान्ति तद्रूपमिति कथ्यते"।

**रूपक** न० रूपयत्यत्र रूप-ण्वुल्। १अभिनयप्रदर्शके दृश्यकाव्यभेदे, "रूपारोपात्तु रूपकम्" तद्दृश्यं काव्यं नटे रामादिस्वरूपारोपात् रूपकमित्युच्यते" सा०द०। तच्च दशविधम् "नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः। ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश" सा०द०। दशरूपकग्रन्थे ऽस्य विवृतिः। रूपमस्त्यस्य कन्। २मूर्त्ते त्रि० मेदि० रूप+स्वार्थे क। ३शुक्लादि वर्णे, ४आकारे च ५अर्थालङ्कारभेदे, सा०द० अलङ्कारशब्दे ४०२पृ० दृश्यम्। ६गुञ्जात्रयपरिमाणे "सगुञ्जो प्रोच्यते गुञ्जा तास्तिस्रो रूपकं भवेत्" युक्तिक०।

**रूपतन्मात्र** न० सांख्यमतादिप्रसिद्धे तेजःपदार्थारम्भके सूक्ष्मभूतभेदे तन्मात्रशब्दे ३२२६ पृ० दृश्यः।

**रूपधारिन्** त्रि० रूपं धारयति धारि-णिनि। १रूपवति, २सौन्दर्यान्विते, ३वेशान्तरग्राहिणि नटे च।

**रूपवत्** त्रि० रूप+मतुप् मस्य वः। १शुभ्रादिरूपविशिष्टे, २सौन्दर्ययुक्ते ३आकारविशिष्टे च।

**रूपाजीवा** स्त्री रूपं सौन्दर्यमाजीवो जीविका यस्याः। वेश्यायाम् अमरः।

**रूपिका** स्त्री रूपमस्त्यस्य ठन्। श्वेतार्कवृक्षे रत्नमा०।

**रूप्य** न० रूपाय आहन्यते स्वर्णादि यत्। अलङ्कारादिनिर्माणाय आहन्यमाने १स्वर्णे २रजते च अमरः। स्वार्थे यत्। ३रजतमात्रे रजतशब्दे ४७८८ पृ० दृश्यम्। ४सुन्दरे त्रि० मेदि०।

**रूप्याध्यक्ष** पु० रूप्येषु अध्यक्षः। कोषाध्यक्षे अमरः।

**रूष** धूल्यादिना मिश्रीकरणे अद०चु०उभ०सक० सेट्। रूषयति ते अरुरूषत् त। [कारके त्रि०।

**रूषक** पु० रूष-ण्वुल्। १वासके वृक्षे जटा०। २मिश्री-

**रूषित** त्रि० रूष-क्त। १धूल्यादिभिर्मिश्रिते, २अचिक्कणीकृते च अमरः।

**रे** अव्य० रा-के। नीचाह्वाने सम्बोधने हेमच०।

**रेक** शङ्कायां भ्वा० आ० स० सेट्। रेकते अरेकिष्ट। ऋदित् चङि न ह्रस्वः।

**रेक** पु० रिच-घञ्। १विरेचने। रेक-अच्। २शङ्कायां, ३नीचे मेदि० ४भेके पुंस्त्री० जटा०। स्त्रियां ङीष्। रेक-भावे घ। ५सन्देहे स्त्री हेमच० टाप्।

**रेक्णस्** न० रिच-असुन् णिच्च तेन कुत्वं नुट्। स्वर्णे निघ०।

**रेखा** स्त्री लिख-अच् लस्य रः। १अंशे, २छद्मे, ३आभोगे, बिन्दुपुञ्जकृते दण्डाकारे ४चिह्नभेदे (दाडि) (कसा) त्रिषु। ५सुमेरुलङ्कयोर्मध्यस्थस्थूलगस्थलभेदे च।

**रेखागणित** न० रेखायाः गणितं प्रमाणस्वरूपादि यत्र। जगन्नाथपण्डितकृते गणितग्रन्थभेदे क्षेत्रशब्दे तत्परिभाषादिकं २२८६ पृ० उक्तम्।

**रेखापुर** न० भुवो मध्यस्थस्थः पुरम्। "राक्षसालयदेवौकःशैलयोर्मध्यसूत्रगाः। रोहितकमवन्ती च तथा सन्निहितं सरः" सू०सि० उक्ते पुरे। "राक्षसालयं लङ्का देवानां ओकःस्वरूपः पर्वतो मेरुस्तयोर्मध्ये ऋजुसूत्रं तत्र स्थिता देशा रेखाख्याः लङ्कादिक्षिणस्थलस्यास्तनुपयुक्तास्तत्र मनुष्यागोचरत्वादिति नोक्ताः। ज्ञानार्थमुदाहरति। रोहीतकमिति। यथा रोहीतकं नगरमवन्त्युज्जयिनीसन्निहितं सरः कुरुक्षेत्रम्। चकारस्तथेत्यव्ययपरः। तथान्यानि परस्परं सन्निहिततया ज्ञेयानि" रङ्ग०।

**रेचक** न० रेचयति रिच-णिच्-ण्वुल्। १कङ्कुष्ठे राजनि० २यवक्षारे, पु० त्रिका०। ३जयपाले, ४तिलकवृक्षे पु० राजनि०। ५पुरीषनिःसारके त्रि०। क्रीडार्थजलनिःसारयन्त्रे न० (पिचकारी) राजनि०। ६कोष्ठस्थवायोर्निःसारके व्यापारभेदे कुम्भकशब्दे २११४ पृ०दृश्यम्।

**रेचन** न० रिच-ल्युट्। १मलभेदनेन तन्निःसारणे। २कोष्ठात् वायोर्नासिकया निःसारणे च।

**रेचनक** पु० रिच्यतेऽनेन ल्युट् संज्ञायां कन्। १काम्पिल्ल० वृक्षे। कनभावे वा ङीप्। रेचनी तत्रार्थे शब्दर०। २दन्तीवृक्षे ३कालाञ्जन्यां राजनि०। ४श्वेतत्रिवृतायाम् स्त्री मेदि० टाप्। ५काम्पिल्लवृक्षे स्त्री शब्दर०।

**रेची** स्त्री रेचयति अच् गौ० ङीष्। १काम्पिल्लवृक्षे २अङ्कोठे च राजनि०। [दित् चङि न ह्रस्वः।

**रेज** दीप्तौ भ्वा० आत्म० अक० सेट्। रेजते अरेजिष्ट। ऋ-

**रेजति** स्त्री रज+अति। उत्तरस्यां दिशि निघण्टुः।

**रेट** याचने वाचि च द्वि० भ्वा० उभ० सेट्। रेटति ते अरेटीत् अरेटिष्ट। ऋदित् चङि न ह्रस्वः।

**रेणु** पुंस्त्री० री-नु। १परागे २धूलौ च अमरः। ३रेणुकायां स्त्री ४पर्पटे पु०। ५पांशौ च राजनि०।

**रेणुका** स्त्री रेणुना कायति कै-क। मरिचाकृतौ १सुगन्धिद्रव्ये अमरः "रेणुका कटुका पाके तिक्तानुष्णा लघुः कटुः। पित्तला दीपनी मेध्या पाचनी गर्भपातिनी। बलासवाततृष्णाघ्नी कण्डूविषदाहनुत्" भावप्र०। २जमदग्निपत्न्यां ३परशुराममातरि च।